শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ গীতামাহাত্ম্যম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ গীতামাহাত্ম্যম্ ॥

ধরোৱাচ
ভগৱন্ পরমেশান ভক্তিরৱ্যভিচারিণী।
প্রারব্ধং ভুজ্যমানস্য কথং ভৱতি হে প্রভো॥ **1** ॥

শ্রী ৱিষ্ণুরুৱাচ
প্রারব্ধং ভুজ্যমানো হি গীতাভ্যাসরতঃ সদা।
স মুক্তঃ স সুখী লোকে কর্মণা নোপলিপ্যতে॥ **2** ॥

মহাপাপাদিপাপানি গীতাধ্যানং করোতি চেৎ।
ক্বচিৎস্পর্শং ন কুর্ৱন্তি নলিনীদলমম্বুৱৎ॥ **3** ॥

গীতাযাঃ পুস্তকং যত্র যত্র পাঠঃ প্রৱর্ততে।
তত্র সর্ৱাণি তীর্থাণি প্রযাগাদীনি তত্র ৱৈ॥ **4** ॥

সর্ৱে দেৱাশ্চ ঋষযো যোগিনঃ পন্নগাশ্চ যে।
গোপালা গোপিকা ৱাপি নারদোদ্ধৱপার্ষদৈঃ॥ **5** ॥

সহাযো জাযতে শীঘ্রং যত্র গীতা প্রৱর্ততে।
যত্র গীতাৱিচারশ্চ পঠনং পাঠনং শ্রুতম্।
তত্রাহং নিশ্চিতং পৃথ্ৱি নিৱসামি সদৈৱ হি॥ **6** ॥

গীতাশ্রযেঽহং তিষ্ঠামি গীতা মে চোত্তমং গৃহম্।
গীতাজ্ঞানমুপাশ্রিত্য ত্রীল্লোকান্পালযাম্যহম্॥ **7** ॥

গীতা মে পরমা ৱিদ্যা ব্রহ্মরূপা ন সংশযঃ।
অর্ধমাত্রাক্ষরা নিত্যা স্বানির্ৱাচ্যপদাত্মিকা॥ **8**॥

চিদানন্দেন কৃষ্ণেন প্রোক্তা স্বমুখতোঽর্জুনম্।
ৱেদত্রযী পরানন্দা তত্ত্বার্থজ্ঞানসংযুতা॥ **9**॥

যোঽষ্টাদশজপো নিত্যং নরো নিশ্চলমানসঃ।
জ্ঞানসিদ্ধিং স লভতে ততো যাতি পরং পদম্॥ **10**॥

পাঠে সমগ্রেঽসম্পূর্ণে ততোঽর্ধং পাঠমাচরেৎ।
তদা গোদানজং পুণ্যং লভতে নাত্র সংশযঃ॥ **11**॥

ত্রিভাগং পঠমানস্তু গঙ্গাস্নানফলং লভেৎ।
ষডংশং জপমানস্তু সোমযাগফলং লভেৎ॥ **12**॥

একাধ্যাযং তু যো নিত্যং পঠতে ভক্তিসংযুতঃ।
রুদ্রলোকমৱাপ্নোতি গণো ভূৎৱা ৱসেচ্চিরম্॥ **13**॥

অধ্যাযং শ্লোকপাদং ৱা নিত্যং যঃ পঠতে নরঃ।
স যাতি নরতাং যাৱন্মন্ৱন্তরং ৱসুন্ধরে॥ **14**॥

গীতাযাঃ শ্লোকদশকং সপ্ত পঞ্চ চতুষ্টযম্।
দ্বৌ ত্রীনেকং তদর্ধং ৱা শ্লোকানাং যঃ পঠেন্নরঃ॥ **15**॥

চন্দ্রলোকমৱাপ্নোতি ৱর্ষাণামযুতং ধ্রুৱম্।
গীতাপাঠসমাযুক্তো মৃতো মানুষতাং ৱ্রজেৎ॥ **16**॥

গীতাভ্যাসং পুনঃ কৃৎৱা লভতে মুক্তিমুত্তমাম্।
গীতেত্যুচ্চারসংযুক্তো ম্রিযমাণো গতিং লভেৎ॥ **17**॥

গীতার্থশ্রৱণাঽঽসক্তো মহাপাপযুতোঽপি ৱা।
ৱৈকুণ্ঠং সমৱাপ্নোতি ৱিষ্ণুনা সহ মোদতে॥ **18**॥

গীতার্থং ধ্যাযতে নিত্যং কৃৎৱা কর্মাণি ভূরিশঃ।
জীৱন্মুক্তঃ স ৱিজ্ঞেযো দেহান্তে পরমং পদম্॥ **19** ॥

গীতামাশ্রিত্য বহৱো ভূভুজো জনকাদযঃ।
নির্ধূতকল্মষা লোকে গীতা যাতাঃ পরং পদম্॥ **20** ॥

গীতাযাঃ পঠনং কৃৎৱা মাহাত্ম্যং নৈৱ যঃ পঠেৎ।
ৱৃথা পাঠো ভৱেত্তস্য শ্রম এৱ হ্যুদাহৃতঃ॥ **21** ॥

এতন্মাহাত্ম্যসংযুক্তং গীতাভ্যাসং করোতি যঃ।
স তৎফলমৱাপ্নোতি দুর্লভাং গতিমাপ্নুযাৎ॥ **22** ॥

সূত উৱাচ
মাহাত্ম্যমেতদ্গীতাযা মযা প্রোক্ত সনাতনম্।
গীতান্তে চ পঠেদ্যস্তু যদুক্তং তৎফলং লভেৎ॥ **23** ॥

॥ ইতি গীতামাহাত্ম্যম্ সমাপ্তম্॥